श्री सायिनाथ महिमा स्तोत्रं

श्री सायिनाथ महिमा स्तोत्रं

सदा सत्स्वरूपं चिदानंदकंदं
जगत्संभवस्थान संहार हेतुं
स्वभक्तेच्छया मानुषं दर्शयंतं
नमामीश्वरं सद्गुरुं सायिनाथं || 1 ||

भवध्वांत विध्वंस मार्तांड मीढ्यं
मनोवागतीतं मुनिर्ध्यान गम्यं
जगद्व्यापकं निर्मलं निर्गुणं त्वां
नमामीश्वरं सद्गुरुं सायिनाथं || 2 ||

भवांभोधिमग्नार्दितानां जनानां
स्वपादाश्रितानां स्वभक्ति प्रियाणां
समुद्धारणार्थं कलौ संभवंतं
नमामीश्वरं सद्गुरुं सायिनाथं || 3 ||

सदा निंबवृक्षस्य मूलाधिवासात्
सुधास्राविणं तिक्तमप्य प्रियंतं
तरुं कल्पवृक्षाधिकं साधयंतं
नमामीश्वरं सद्गुरुं सायिनाथं || 4 ||

सदा कल्पवृक्षस्य तस्याधिमूले
भवद्भाव बुद्ध्या सपर्यादि सेवां
नृणां कुर्वतां भुक्ति मुक्ति प्रदंतं
नमामीश्वरं सद्गुरुं सायिनाथं || 5 ||

अनेका श्रृता तर्क्य लीला विलासैः
समाविष्कृतेशान भास्वत्प्रभावं
अहंभावहीनं प्रसन्नात्मभावं
नमामीश्वरं सद्गुरुं सायिनाथं || 6 ||

सतां विश्रमाराममेवाभिरामं
सदासज्जनैः संस्तुतं सन्नमद्भिः
जनामोददं भक्त भद्रप्रदं तं
नमामीश्वरं सद्गुरुं सायिनाथं || 7 ||

अजन्माद्यमेकं परब्रह्म साक्षात्
स्वयं संभवं राममेवावतीर्णं
भवद्दर्शनात्संपुनीतः प्रभोऽहं
नमामीश्वरं सद्गुरुं सायिनाथं || 8 ||

श्रीसायीश कृपानिधेऽखिलनृणां सर्वार्थसिद्धिप्रद
युष्मत्पादरजः प्रभावमतुलं धातापिवक्ताऽक्षमः |
सद्भक्त्या शरणं कृतांजलिपुटः संप्रापितोऽस्मिप्रभो
श्रीमत्सायिपरेशपादकमलान् नान्यच्छरण्यंमम || 9 ||

सायिरूपधर राघवोत्तमं
भक्तकाम विबुध द्रुमं प्रभुं,
माययोपहत चित्तशुद्धये
चिंतयाम्यहमहर्निशं मुदा || 10 ||

शरत्सुधांशु प्रतिमं प्रकाशं
कृपात पत्रं तव सायिनाथ |
त्वदीय पादाब्ज समाश्रितानां
स्वच्छायया तापमपाकरोतु || 11 ||

उपासना दैवत सायिनाथ
स्तवैर्मयोपासनिनास्तुतस्त्वं |
रमेन्मनोमे तवपादयुग्मे
भृंगो यथाब्जे मकरंद लुब्धः || 12 ||

अनेक जन्मार्जित पापसंक्षयो
भवेद्भवत्पाद सरोज दर्शनात्
क्षमस्व सर्वानपराध पुंजकान्
प्रसीद सायीश सद्गुरोदयानिधे || 13 ||

श्रीसायिनाथ चरणामृत पूर्णचित्ता
तत्पाद सेवनरतास्सततं च भक्त्या |
संसारजन्यदुरितौघ विनिर्गतास्ते
कैवल्यधाम परमं समवाप्नुवंति || 14 ||

स्तोत्रमेतत्पठेद्भक्त्या योन्नरस्तन्मनाः सदा
सद्गुरोः सायिनाथस्य कृपापात्रं भवेद्ध्रुवं || 15 ||

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवण नयनजं वा मानसं वापराधं |
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीप्रभो सायिनाथ ||

श्री सच्चिदानंद सद्गुरु सायिनाथ् महराज् की जै |
राजाधिराज योगिराज परब्रह्म सायिनाध् महाराज्
श्री सच्चिदानंद सद्गुरु सायिनाथ् महराज् की जै |